# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| | | |
|---|---|---|
| **कक्षा – शास्त्रिद्वितीयवर्षम्** (SEM-3) | **प्रश्नपत्रम् – ७** (O.E.-2.3.3.) (ग्रन्थः -द्वितीयदीक्षा व्यवहारप्रदीपः, प्रथम-द्वितीयभागौ) | **गुणाः – ७०** |
| **विषयः -क्रियात्मकंसंस्कृतशिक्षणम्** | | |
| **दिनाङ्कः – ११/१२/२०१८** | | **समयः -०२.०० तः ०५.००** |

**प्रथमान्वितिः**

**प्रश्नः १ कोष्ठसंकेतानुसारेण वाक्यसंरचना विधेया –** **( १० )**

**उदाहरण :-** <u>पशु</u> वने चरतः (पशु) ।

(१) ____________________ कार्यं कुर्वन्ति । (अभियन्तृ )

(२) कवयः काव्यानि ____________________ । (रच् लट् )

(३) ____________________ अपशब्दं न वदन्ति । (साधु )

(४) आश्रमे ____________________ निवसन्ति स्म । (ऋषि)

(५) ____________________ बुद्धस्य मूर्तिः । (एतद्)

(६) ____________________ जलं सिञ्चति । (शकुन्तला )

(७) सुभद्रा कृष्णस्य ____________________ । (स्वसृ)

(८) ____________________ पायसं पचन्ति । (मातृ )

(९) दशरथस्य ____________________ पुत्राः सन्ति । (चतुर् )

(१०) ____________________ सुन्दरे स्तः (अक्षि)

(११) तस्य ____________________ भग्ने स्तः (जानु) ।

(१२) तस्याः पुत्रौ ____________________ स्तः (साधु ) ।

**प्रश्नः २ अधोलिखितानाम् शब्दानाम् प्रथमाविभक्तौ रूपाणि लेखनीयानि –** **( १० )**

| | |
|---|---|
| (१) अग्नि | (७) तनु |
| (२) शिशु | (८) मधु |
| (३) पितृ | (९) महत् (पुं.) |
| (४) खलपू | (१०) विद्वस् (पुं.) |
| (५) गो | (११) धनुष् (नपुं.) |
| (६) मातृ | (१२) सम्पद् (स्त्री) |

## द्वितीयान्वितिः

**प्रश्नः ३ अधस्तनवाक्येषु द्वितीयाविभक्तिं संयोज्य वाक्यविस्तारं कुरुत -** **( १० )**

**उदाहरण :-** माता शिशुः लालयति ⇨ माता शिशुं लालयति

(१) छात्राः कपिः पश्यतन्ति ।

(२) अहम् बन्धवः आह्वयामि ।

(३) सः धेनवः प्रेषयति ।

(४) दूतः राजा सूचयति ।

(५) छात्रः गुरुः विना वेदान् न पठति ।

(६) विश्वविद्यालयः निकषा सोमनाथमन्दिरम् ।

(७) गोपः गौः पयः दोग्धि ।

(८) राजेशः अजा ग्रामं हरति ।

(९) प्रेमिका किमर्थं जङ्गमवाणी नोत्थापयति ?

(१०) गृहिणी विना गृहं शून्यतां याति ।

**प्रश्नः ४** संस्कृतभाषायाः महत्त्वविषये सुरगिरा निबन्धः लेख्यः । **( १० )**

**( अथवा )**

''भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा'' अस्मिन् विषये मौलिकं चिन्तनं प्रसूयताम्

## तृतीयान्वितिः

**प्रश्नः ५ निर्देशानुसारं समीचीनानि वाक्यानि लिखत ।** **( १० )**

(१) ____________________नाम श्वेता वा ? (भवत् स्त्री)

(२) मम नाम जयशङ्करः, __________ नाम किम् (भवत् पुं.)?

(३) एताः नर्तक्यः, ____________ काः ? । (तद् स्त्री. )

(४) दर्शना ____________ कक्ष्यायां पठति ? । (किम् )

(५) ____________________महिलासु बहु धैर्यम् अस्ति । (तद्)

(६) ____________________ स्त्रीभ्यः शाटिकाः प्रियाः भवन्ति । (इदम् )

(७) ____________________ वाटिकासु फलानि सन्ति (सर्व)

(८) ____________________ धनं कः स्वीकरोति । (भवत् स्त्री. )

(९) ____________________ संस्कृत-सेवकाः स्मः । (अस्मेत् )

(१०) ____________________संस्कृतभाषा पठनीया । (सर्व )

**प्रश्नः ६** 'किं नाम अव्ययम्' इति विलिख्य अव्यययुक्तानि दश वाक्यानि लिखत। **( १० )**

**( अथवा )**

भवतः सम्भाषणपाठ्यक्रमस्य कामपि सरलां कथां विलिख्य तत्र आगतानां सर्वनाम पदानाम् अव्ययपदानाञ्च आवलिं कुरुत।

**प्रश्नः ७ प्रश्नानां लघूनि उत्तराणि लेख्यानि। ( यथेच्छं दशानामेवं )** **( १० )**

(१) 'दाता यच्छति' अस्य बहुवचनं कुरुत।

(२) 'जामातरः यान्ति' अस्मिन् वाक्ये प्रातिपदिकम् किम् ?

(३) वक्तृशब्दस्य प्रथमाबहुवचने किं रूपम् ?

(४) कपि, हरि, पटु, दधि एतेषु नपुंसके कः शब्दः ?

(५) अक्षिणी, मधुनी, हरी, दीर्घे, धेनूः एतेषु प्रथमान्तपदं किं नास्ति ?

(६) आत्मन् - शब्दस्य प्रथमाविभक्तौ रुपाणि लिखत।

(७) शिष्यः गुरू नमति। अत्र द्वितीयान्तपदं किम् ?

(८) मरुतौ, धीमन्तौ, आशिषौ, कलाकृतयः एतेषु, दितीया विरही कः ?

(९) संस्कृतं विना संसकृतिः नास्ति। अत्र कस्य योगे द्वितीया।

(१०) परीक्षाभवनस्य परितः स्वच्छता वर्तते। वाक्यमिदं शुद्धं कुरुत।

(११) तद्, एतद्, भवत्, सरित्, एतेषु नायं सर्वनामशब्दः।

(१२) 'बालिका भवते किं दत्तवती' अत्र सर्वनामसंज्ञकौ कौ शब्दौ ?

(१३) भवत्शब्दस्य सप्तविभक्तिषु एकवचने रूपाणि लिखत (पुंसि)।

(१४) युष्मद्शब्दस्य सप्तसु विभक्तिषु बहुवचने रूपाणि लिखत।

(१५) 'अव्ययस्य' पद्यात्मिकां परिभाषां लिखत।

--००--